National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 158-162
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. नरेशकुमारबैरवा**
सहायकाचार्यः, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 110016

**Correspondence:**
**डॉ. नरेशकुमारबैरवा**
सहायकाचार्यः, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 110016

# भारतीयज्ञानपरम्परायां पाणिनिव्याकरणस्य वैशिष्ट्यम्

**डॉ. नरेशकुमारबैरवा**

**उपसंहारः**

अत एव वक्तुं शक्यते यत् भारतीयज्ञानपरम्परायां पाणिनिव्याकरणस्य महद्वैशिष्ट्यं दरीदृश्यते। व्याकरणशास्त्रस्य या परम्परा, तस्याः परम्परायाः ब्रह्मातः आरभ्य अद्यावधिपर्यन्तं निर्व्यूढं नैरन्तर्यं प्रवहति। अस्यां परम्परायां न केवलं ज्ञानविज्ञाने अपितु शास्त्रे सर्वत्र नदीसलिलवत् प्रवहति चेति शम्।

**मुख्यशब्दाः–** व्याकरणशास्त्रम्, प्रमाणभूतः, अर्द्धमात्रालाघवेन, लौकिकवैदिकोभयविध-शब्दानुशासन-त्वम्, साधुशब्दानामन्वाख्यायकम्।

**प्रस्तावना -**

भारतीयज्ञानपरम्परायां पाणिनिव्याकरणस्य महद्योगदानं वर्तते। यथा समेऽपि जानन्त्येव पाणिनिव्याकरणं विना किमपि नैव ज्ञातुं शक्यते। व्याकरणशास्त्रस्य या परम्परा सा अतीवा विशिष्टा वर्तते। इयं परम्परा ब्रह्मणः प्रारभ्याद् अद्यावधिपर्यन्तं प्रचलिन्ति स्म।

यद्यपि पाणिनीयशास्त्रतत्त्वानुशीलिनां हृदि पाणिनीय महत्त्वं स्वतः प्रकाशते, तावत् तस्य महत्त्वम् अस्माभिः प्रख्याप्यते। येन अपरिपक्वमतिभिरप्यनायासेन प्रतिपद्यते पाणिनीयस्योत्कृष्टत्वं निरूप्यते च। विख्यातमेवैतद् व्याकरणनिर्माणप्रगुणधिषणावाप्तये तपस्यता पाणिनिना तीव्रतपः परितुष्टमहेश्वर-नादितढक्काद्वारा चतुर्दशसूत्रोपदेशसमनन्तरमहेश्वर-प्रसाद-वश-समवाप्त-व्याकरण-प्रणयनानुगुणमतिना अष्टाध्यायीरूपं व्याकरणशास्त्रं निर्ममे इति। एवञ्चास्य महत्त्वे महेश्वरप्रसाद एव तावत् बीजं वर्तते। यतोहि तपः प्रसादित-महेश्वरानुकम्पासम्पादित-प्रज्ञाविशेषप्रणीतत्वात् तस्य प्राशस्त्यं निरूपितम्। अपि च माहेश्वरसूत्रकदम्बं श्रुतिरेव, "इदमक्षरच्छन्दः समनुक्रान्तम्" इत्युक्तत्वात्। "सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः " इति महाभाष्ये महर्षिपतञ्जलिना प्रतिपादितम्। आम्नायसमाम्नायशब्दाभ्यां हि श्रुतिरेव व्यवह्रियते। ब्रह्मराशिरित्यस्य च ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः। अनेनास्य न केवलं साधुवर्णबोधकत्वमपितु ओंकारवद् ब्रह्मप्रतिपादकत्वमपि, अकारादेः प्रत्येकं बीजरूपत्वात्। अत एव "न भुक्त्वा प्रब्रूयाद् " इत्यादिकथनमपि युज्यते। नन्दिकेश्वरकृतकाशिकायाञ्चास्य ब्रह्मप्रतिपादको स्पष्टीकृताऽस्ति। एवञ्च श्रुत्यात्मकमाहेश्वरसूत्र —समूहमूलकत्वात् पाणिनीयस्य महत्त्वं समुचितं द्वितीयमुत्कर्षबीजं वर्तते।

अपरञ्च "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुखउपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्" इति महाभाष्ये भगवान् पतञ्जलिनापाणिनी-यसूत्राणाम् उत्कर्षबीजानि निरूपितवान्। तत्रैवमाचार्यस्य पाणिनेः प्रमाणभूतत्वं तत्तेन प्रणीतग्रन्थ-स्योत्कर्षबीजं प्रतिपादितम्। आप्तोपदिष्टस्य हि वाक्यस्य प्रमाणत्वम्। पाणिनिश्च प्रमाणभूतोऽभ्रान्त इति तदुपदिष्टशास्त्रस्य अप्रामाण्यशङ्कानिराकरणात् निश्चितं प्रमाणत्वमिति।

अन्यच्च दर्भपवित्रपाणित्वं, पवित्रस्थलोपदिष्टं, प्राङ्मुखत्वं चेति त्रयं पाणिनेः व्याकरणनिर्माण-कालेऽपि पवित्रता सूचनाद्वारा तत्प्रणीतसूत्राणां पवित्रत्वम् (अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितबोध-

जनकत्वरूपम्) अभिव्यक्तीकरोतीति द्वितीयमुत्कर्षबीजम्। तृतीयम् उत्कर्षबीजं तु महाप्रयत्नपूर्वकप्रणीतत्वम्। न ह्यनवधानपूर्वकम-वहेलयाभिज्ञजनकृतमपि सौष्ठवम् आसादयति, पाणिनिस्तु सावधानतया बृहत्या भावनया सूत्राणि कृतवान्। अतः स्खलनशङ्कानिरासात् सर्वथा प्रमाणान्येवेति।

अत्र यदि काश्चिद् ब्रूयात्, महेश्वरप्रसादलब्ध-प्रज्ञापरावरज्ञस्य पाणिनेर्ग्रन्थनिरमाणे महतः प्रयत्नस्य कुतोऽपेक्षते। स इत्थं बोधनीयः — पाणिनेः परावरज्ञत्वेऽपि असाधुशब्देभ्यः साधूनां विवेचने, साधुष्वपि यथासम्भवसामान्यसूत्रप्रणयनाय अनेकलक्ष्यानुगतसा-मान्यधर्माऽनुसन्धाने, तदपवादपरिशीलने च प्रणिधान-प्रयत्नापेक्षा आवश्यकी। नहि मुनयोऽपि सर्वे युक्ता एव, येन सर्वेषां सर्वदा सर्वार्थभानं स्यात्। अपि तु युञ्जाना एव बहवः। युञ्जानत्वे च चिन्तयैव दुरूहार्थभानं जायते। तथा चोक्तम् —

**योगजो द्विविधः प्रोक्तौ युक्तयुञ्जानभेदतः।**

**युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः।।**[8] इति

अत्र च दिलीपवशिष्ठसंवादमनुसृत्य क्रियताविश्वसः। पुरा किल दिलीपेन राज्ञा 'मम सन्ततिः कुतो न इतिपृष्टौ वशिष्ठऋषि-स्तत्सम्मतेः प्रतिबन्धकं कामधेनुप्रदत्तशापं ध्यात्वैवावगत्यावोचत् न तु ध्यानमकृत्वा। एवञ्च पाणिनेरपि तत्तदर्थचिन्तनयैव परावरज्ञत्वं, न तु सर्वदा सर्वार्थभानात्। तत्तत्प्रतिनियतशब्दनिष्ठासाधुत्वं च पुण्यजनकत्वरूपं लौकिकप्रमाणैरवधारयितुमशक्यत्वेनान्तरचिन्तनै-वावधारणीयम्। एवञ्च यथा अन्नान्तरमिश्रित विकीर्णधान्यानां चयने महान् प्रयत्नोऽपेक्षितः। तथा अनेकभाषामिश्रितवाण्यां विवेकादावपि महान् प्रयत्न आवश्यक एव तदभावे क्वचित् स्खलनसम्भवादिति। तस्मान्महता प्रयत्नेन प्रणीतत्वं गौरवावधायकमेव।

एतावता पाणिनीयस्य महत्त्वे पञ्च हेतवो प्रदर्शिताः सन्ति –

1.तपः – प्रसादित-महेश्वर-प्रभाव-समासादित-प्रज्ञाविशेषा आचार्य-प्रणीतत्वम्।

2.श्रुतिरूप-माहेश्वर-सूत्रसमूलकत्वम्।

3.प्रमाणभूताचार्यप्रणीतत्वम्।

4.दर्भं पवित्राणि पवित्रदेशप्राङ्मुखोपदिष्टतया पवित्रीभूयः निमित-त्वम्।

5.महाप्रयत्नपूर्वैकसावधानतया रचितत्वं चेति।

किञ्च पाणिनीयव्याकरणं लौकिकवैदिकोभयविधानां शब्दानाम् अनुशासनम्। भाष्ये 'अथ शब्दानुशासनम्' इत्यधिकृत्य केषां शब्दानामिति परेण पृष्टे लौकिकानां वैदिकानाञ्चेति प्रयुक्तत्वात्। तत्र लौकिकानामित्यस्य लोके एव प्रयुज्यमानानामिति नार्थः, अपितु ये लोके प्रयुज्यन्ते, ये च लोके वेदे च तेषामिति। वैदिकानाम् इत्यस्य तु वेदे एव स्थितानामित्यर्थः। तेन लौकिकास्तावद् गौरश्वः पुरुषो हस्तीत्यादीनां लौकिकत्वेनोक्तानां वेदप्रयुज्यमानत्वेऽपि नासंगतिः। वैदिकानामित्यस्य तु वेदे एव प्रयुक्तानामित्यर्थः। अत एव भाष्ये वैदिकोदाहरणतया 'शन्नो देवीरभिष्टय' इत्यादिवैदिकवाक्यान्ये-वोक्तानि। वैदिकपदानि तु गृभ्णामीत्यादीत्युदाहर्त्तव्यानि, तेषां वेदे एव प्रयोगात्।

चान्दसारस्वतादिव्याकरणं तु केवलौकिकानामेवानुशासनमिति ततोऽस्य वैशिष्ट्यम्।

अपि च पाणिनीयमेतत् प्रतिपदमुदात्तानुदात्तस्वरितानां स्वराणा-मप्यनुशासनम्। लोके कथञ्चिदेकश्रुत्या पाठनिर्वाहेऽपि वेदे सस्वरपाठस्यावश्यकत्वात्। तथा चोक्तम् —

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[9]

चान्द्रादिव्याकरणानि तु न स्वरबोधकानीत्यतोऽपि तेभ्योऽस्य वैशिष्ट्यम्। अत एव सम्प्रत्येतदेव व्याकरणं वेदाङ्गमिति[10] वक्तुं शक्यते।

व्याकरणतत्त्वं हि वेदवद् अनादिभूतमेव। पाणिनिस्तु तादृशतत्वस्य स्मर्त्तैव। अत एवेदं व्याकरणं स्मृतिपदवीमारोहति 'साधुत्वज्ञान-विषया सैषा व्याकरणस्मृतिः' इति पाणिनीयोपक्रम्य हरिणोक्तम्।[11] इतः पूर्वमप्येतादृशमेव व्याकरणमासीत्। तदानीं तेनैव वेदस्य व्याकरणरूपाङ्गयोगिता। एतेन पाणिनीयस्य वेदाङ्गत्वे इतः पूर्वं वेदस्य अङ्गहीनत्व शङ्का निरस्ता।

अनेन पाणिनीयस्योत्कृष्टत्वे बीजत्रयमुक्तं भवति —

6.लौकिकवैदिकोभयविधशब्दानुशासनत्वम्।

7.प्रतिपदं स्वरान्वाख्यायकत्वम्।

8.वेदाङ्गत्वम् चेति।

पूर्वोक्तसङ्कलनया त्वष्टौ बीजानि।

अपि च अष्टाध्यायीरूपं व्याकरणं शाकटायनस्फोटायनशाकल्या-पिशलिगार्ग्यप्रभृत्यनेकप्रणीतव्याकरणपर्यालोचनपूर्वकं पाणिनिना प्रणीतम्। तथा च केषाञ्चित् स्वग्रन्थप्राशस्त्यरूपपूजार्थं[12], केषाञ्चित् तत्तत्प्रयोग साधुत्वस्मारकतया नामानि संकीर्त्ति तानीति सुज्ञानं पाणिनीयव्याकरणविज्ञैः।[13] तथा च —

(9) अस्य अनेकव्याकरणपर्यालोचनपूर्वकप्रणीतत्वाद् व्याकरणान्तरा-पेक्षया अभ्यर्हितत्वम्।

अपि च तथा यथा ब्रह्मसूत्रादि अनेकाध्याययुक्तम, अध्यायाश्च चतुर्भिश्चतुर्भिः पादैर्विभक्ताः, तथा पाणिनीयसूत्रकदम्बमपि। तथा च-

(10) अस्य चतुश्चतुःपादयुतानेकाध्यायशालितया निर्माणप्रकारेण ब्रह्मसूत्रादिसाम्यं दशममुत्कर्षबीजम्।

अपि च व्याकरणान्तरप्रणेतृभिर्धातवः कार्त्स्न्येन नोपदिष्टाः। अष्टाध्यायात्मकव्याकरणविरचयिता पाणिनिस्तु भ्वादिचुराद्यन्तैर्न-वभिर्गणैविभक्तेन धातुपाठेन निखिलामपि धातून् उपदिष्टवान्। तथा च —

(11) पाणिनीयस्य धातुपाठेनोपदिष्टलौकिकवैदिकोभयविधसकलधातुस्वरेण सहितत्वमेकादशं महत्त्वबीजम्।

पाणिनीयश्च साधुशब्दानामन्वाख्यायकं साधूनाम् इदमन्वाख्यानमित्यभियुक्तोक्तेः।[14] मृजिप्रसङ्गे मार्जिः साधुर्भवतीत्यादिभाष्याच्च, 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति हरिणा प्रोक्तत्वाच्च।[15] साधुत्वं च वैयाकरणमते पुण्यजनकत्वम् — एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति श्रुतेः प्रमाणितम।[16] क्रतुविषये नानृतं वदेदिति श्रुतौ अनृतपदेनार्थानृतशब्दानृतयोरुभयोरपि ग्रहणस्य मीमांसायां निर्णीततया शब्दानृतत्वस्य पुण्यजनकत्वरूपत्वाच्च।

तथा च तादृशशब्दानुशासनत्वादस्य स्मृतितत्वम्। उक्तञ्च आचार्यभर्तृहरिणा 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति। एवञ्च —

(12) पुण्यजनशब्दोपदेशत्वादस्य स्मृतित्वं द्वादशमुत्कर्षबीजम्।

यद्यपि व्याकरणान्तरस्यापि साधुशब्दानान्वाख्यायकतया स्मृतित्वं वक्तुं शक्यम्। तथापि तस्य न केनाभियुक्तेन स्मृतित्वं प्रतिपादितम्। अस्य पुनःमहाभाष्यव्याख्यात्रा तत्सिद्धान्तानिसारेण वाक्यपदीयमाकरग्रन्थं निर्मितवता महावैयाकरणेन हरिणा स्मृतित्वं प्रतिपादितम्। किञ्चास्तु व्याकरणान्तरस्यापि स्मृतित्वादुत्कृष्टत्वं, नैव तावता पाणिनीयस्य स्मृतित्वमुत्कर्षबीजं नेति वक्तुं शक्यम्।

येन येन हि हेतुना व्याकरणान्तरस्योत्कृष्टत्वं तेन तेन हेतुना त्वस्योत्कृष्टत्वम् अस्त्येव। तर्हि स्मृतित्वात् किमपेक्षयोत्कृष्टत्वमस्येति चेत् स्मृतिविभिन्नग्रन्थापेक्षयेत्यवेहि। हन्त भोस्तदा किं न्यायदर्शनादिभ्योऽप्यस्य महत्त्वम्? कः सन्देहः, पुण्यशब्दोपदेष्टृत्वेन व्याकरणे मन्तव्यमेवोत्कृष्टत्वम्। यथा सर्वोत्कृष्टोऽपि राजा पाण्डित्यगुणेन कोविदादपकृष्टः कोविदश्च तत उत्कृष्टः, एव तत्तद्विशेषगुणवशाद् उत्कृष्टत्वं व्यवस्थितमित्यलम्।

किञ्च पाणिनीयं मुनित्रयसम्मतं, चान्द्रव्याकरणादिकन्तु एकैकसम्मतम् इत्यतोऽपि गौरवावहम्।

तथा मुनिभ्यां कात्यायनपतञ्जलिभ्यां पाणिनीयं व्याकरणं व्याख्यातम्। इतरत्तु न तथेत्यतोऽपि व्याकरणात्पाणिनिप्रणीतस्य महत्त्वम्। तथा चास्य वैशिष्ट्ये बीजद्वयं वर्तते –

13. मुनित्रयसम्मतत्वम्।

14. व्याख्यानद्वारा मुनिद्वयेनापमृष्टत्रुटिकत्वं च।

अपि च पाणिनीयविषये वदन्त्यभियुक्ताः "अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति। अस्य अयं भावः – पाणिनीयं तथा शब्दलाघवदृष्ट्या प्रणीतं यथा अर्द्धमात्राप्यधिका न स्यात्। एवं स्थितौ यदि केचित् वैयाकरणा अर्द्धामात्राधिक्यं क्वचित् सूत्रे स्वबुद्धया व्यवस्थापयन्ति, तदा तेषां पुत्रजन्मनि यावान् हर्षः तावान् प्रमोदो जायते। अहो अस्माभिरर्द्धमात्रावैर्थ्यमुद्भावितमिति। व्याकरणान्तरं नैवं शब्दलाघवदृष्ट्या प्रणीतम्। तदेतद्धे वक्ष्यामः। शब्दलाघवं च लेखेऽभ्यासे च सौकर्यं जनयति। अतश्च सव्याख्यानं पाणिनीयव्याकरणं बालान् अध्यापयितुकामाविद्वांसः प्रथममष्टाध्यायीपाठमेव कण्ठस्थी कारयन्ति। लघुकलेवरत्वाच्च स्वल्पेनाव समयेन बालाः समभ्यस्य कण्ठस्थीकुर्वन्ति । अष्टाध्याय्या अभ्यासस्तु सूत्राणां पौर्वापर्यावधारणायात्यावश्यक एव । अन्यथा "विप्रतिषेधे परं कार्यम् "[17] इतिसूत्रं "पूर्वत्रासिद्धम् "[18] इति शास्त्रं च प्रयोगेषु प्रवर्तयितुं न पारयेयुः। बाल्यावस्थायां च धारणाशक्तिरत्यधिका भवति । युवत्वे च सा हीयते। वार्धक्ये तु सुतराम्। अत एव च संस्कृतशास्त्रं पिपाठयिषुर्वृद्धाः सर्वतः पूर्वममरकोषमभ्यासयन्ति शिशून् इति सम्प्रदायः। यद्यप्यधुना संस्कारहानिविनाशात् अर्थकाठिन्यं दोषत्वेनोच्यते। शब्दलाघवे चार्थकाठिन्यं निश्चितम्। तथापि पूर्वं दीप्तसंस्कारतया बालानामपि कृते गुरुतः शिक्षया काठिन्यस्य नासीद्दोषता। अधुनापि सद्गुरुशिक्षया न सर्वथा दोषावहत्वम्। लेखाभ्यास-सौकर्यगुणस्तूक्त एव। तस्मात्पाणिनीयं क्लिष्टत्वाद्धेयम् इति मतिरनवधृततद्गुणानामेवेत्यलम्। तथा च –

(15)पाणिनीयस्यार्द्धमात्रापर्यन्तशब्दलाघवदृष्ट्या निर्मित्वं पञ्चदशमुत्कर्षबीजम्।

अस्मिन् व्याकरणे लौकिका अपि तन्मध्यपतितन्यायतक्रकौण्डिन्यन्यायमाठरकौण्डिन्यन्यायएकदेशविकृतन्यायोपजीव्यविरोधन्यायादि न्यायाः समाश्रीयन्ते। तथा केषाञ्चिन्न्यायानां तन्त्रान्तरे वाचनिकानामपि अस्मिन् व्याकरणे लाघवार्थम् अर्थापत्त्या बोधनं कृतम्।

अपि चास्य निर्माणकौशलमतिविलक्षणम् – यथा बहुषु स्थलेषु अनेकवाक्यत्वेन ज्ञायमानानामपि सूत्राणाम् एकवाक्यत्वमन्ते चकारयोजनया एकवाक्यता सूचिता अस्ति। यथा – "स्वरादिनिपातव्यम्"[19], "कृन्मेजन्तः"[20], "क्त्वातोसुन्कसुनः"[21], "तद्धितश्चासर्वविभक्तिः"[22] इति। अत्र चत्वारि वाक्यान्यवगम्यन्ते। वस्तुस्तु एकमेव वाक्यम् "स्वरादिनिपात-मान्तैजन्तकृदन्त-क्त्वातोसुन्कसुनान्तसर्वविभक्तितद्धितान्तानाम् एकस्मिन्नव्ययपदार्थेऽन्वयात्। एवम् "ईदूदेद्द्विवचनं प्रगृह्यम्"[23], "शे"[24], "अदसो मात्"[25], "ईदूतौ च सप्तमी"[26] इति। अत्रापि वाक्यचतुष्टयमापाततो ज्ञायते। किन्तु ईदूदेन्तद्विचनशेप्रत्ययान्त-अदसशब्दावयव-मकारोत्तरेदूदन्त – सप्तम्यर्थपर्यवसन्नेदूदन्तानां प्रगृह्यपदार्थेऽन्वयादेकवाक्यमेव। एवमन्यत्रापि। एवमादीनि बहुनि कौशलानि सन्ति। अपि च पतञ्जलिनोक्तम् – छन्दोवत्सूत्राणि भवन्तीति। एवञ्च पाणिनीयस्य वेदसाम्यमातिदेशिकमपि महत्त्वं सूचयति।

एतावता त्रीण्युत्कर्षबीजान्युक्तानि भवन्ति । यथा —

1. नानालौकिकन्यायानामप्याश्रयणम्।
2. निर्माणकौशलम्।
3. वेदसाम्यं चेति।

इत्थं नानाहेतुभिरुत्तमत्वादयस्य सर्वत्र भूयान् प्रचारः कृतः। आचार्यभर्तृहरिणा चास्य वाक्यपदीये भूयसी प्रशंसा कृता। तथाहि —

**"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः"**

**"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।"**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**
**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं मोक्षमाणानामजिह्मा राजपद्धतिः।**
**अत्राऽतीतविपर्यासः केवलामनुपश्यति।।**[27]

एतेन पाणिनीयस्य प्रशंसापूर्वकं द्वौ गुणावुक्तौ —

1. वाचामसाधुत्वरूपमलसंशोधकत्वम्।
2. अविपर्ययेण विज्ञातुः कैवल्यप्रयोजकत्वं च।

एतच्च वेदवाक्येन महाभाष्ये मुनिना पतञ्जलिनापि प्रोक्तम् —

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**
**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि।।**[28]

अस्यायं सरलार्थः — व्याकरणशास्त्रे निपुणाः तितउना = चालन्या सक्तुमिव मनसा प्रज्ञानेन वाचं पवित्रयन्तः सन्तो विविक्ता कुर्वन्ति। तत्र सूक्ष्मतमशब्दे ब्रह्मसाम्यज्ञानाः सायुज्यं मोक्षं लभन्ते इति। त्रिविधा हि वागस्ति स्थूला, सूक्ष्मा, सूक्ष्मतरा च। तत्र अन्तिमवाचि ब्रह्मणीव दुर्ज्ञानत्वात् परमसौक्ष्म्यं वर्तते। तत्र व्याकरणेन स्मरण-मनन-निदिध्यासनैः ब्रह्मसाम्यमवधारयन्ति। यदा च ब्रह्मसमवस्तु-ग्रहणयोग्या धीरुदयते तदा ब्रह्मणोऽपि प्रत्यक्षज्ञानस्य सौकर्यान्मोक्षं प्रानुभवन्तीति भावः।

**उपसंहारः -**

अत एव वक्तुं शक्यते यत् भारतीयज्ञानपरम्परायां पाणिनिव्याकरणस्य महद्वैशिष्ट्यं दरीदृश्यते। व्याकरणशास्त्रस्य या परम्परा, तस्याः परम्परायाः ब्रह्मातः आरभ्य अद्यावधिपर्यन्तं निर्व्यूढं नैरन्तर्यं प्रवहति। अस्यां परम्परायां न केवलं ज्ञानविज्ञाने अपितु शास्त्रे सर्वत्र नदीसलिलवत् प्रवहति चेति शम्।

**सन्दर्भग्रन्थसूची –**


1. दहालः, आचार्यलोकमणिः, परमलघुमञ्जूषा, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, वर्षम् – 2011.
2. पाण्डेयः, गोपालदत्तः, वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, सं. 2017 वर्षम्।
3. शर्मा, पं. रघुनाथः, वाक्यपदीयम्- अम्बाकर्त्रीटीकासहितम् (तृतीयकाण्डम्), प्रकाशनम्- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
4. शास्त्री, श्री गुरुप्रसादः, सम्पादकः, व्याकरणमहाभाष्यम्, प्रकाशनम्- राष्ट्रियसंस्कृतसंस्थानम्, वर्षम्- 2006.
5. भट्टः, श्रीमत्कौण्डः, विरचितम् – वैयाकरणभूषणसाररः टीकाद्वयं संवलिता प्रभा, दर्पणं च व्याख्याद्वयोपेतः, श्रीबालकृष्णपपञ्चोली, श्री हरिवल्लभशास्त्री, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, वि.सं. 2068.
6. वाक्यपदीयम्, पूनासंस्करणम्।
7. पाणिनिः – अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, सं. 2017 वर्षम्।
8. भट्टः, गदाधरः, व्युत्पत्तिवादः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
9. शर्मा,वासुदेवः,संशोधकः वैयाकरणसिद्धान्तकौमुदी,तत्त्वबोधिनी, प्रकाशनम् – श्री ला.ब.शा.रा.संस्कृतविद्यापीठम्, नवदेहली, वर्षम्- 2009.


**संदर्भ ग्रन्थः -**

[1] नन्दिकेश्वरकृतकाशिकायां प्रतिपादितम् –

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्।।
अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये।।
एवमेव पाणिनीयशिक्षायामपि प्रोक्तम् –
शाङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः।।

[2] ऋग्तन्त्रव्याकरणे शाकटायेन प्रोक्तम्।

[3] प्रत्याहाराह्निके निरूपितम्।

[4] यद्यपि "आम्नायः कुल आगमः । उपदेशे चेति " (3/511) हैमकौषात् "अथाम्नायःसम्प्रदायः" (3/2/7) "स्यादाम्नातोऽन्वये श्रुतौ" (3/3/161) इत्यमरकोषाच्च अर्थान्तरेष्वपि शक्त आम्नायशब्दस्तथापि "श्रुतिः स्त्री वेद आम्नायस्त्रयी " (अमरकोषः 1/6/3) इति कोषाद् वेद एव तत्प्रसिद्धिरिति भावः ।

[5] प्रणवस्य ब्रह्मवाचकत्वं पतञ्जलिना योगसूत्रे प्रत्यपादि - "तस्य वाचकः प्रणवः" (1) इति।

[6] अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्वस्तुषु।
चित्कलामिं समाश्रित्य जगद्रूपमीश्वरः ।।
इत्यादिना तत्रैव प्रतिपादितम्।

[7] पा.सू. 1/1/3 वृद्धिसूत्रव्याख्यानप्रसङ्गे आह्निके, महाभाष्यम् ।

[8] न्यायसिद्धान्तमुक्तावली- 65-66

[9] पा.शि. का.सं. -52

[10] अङ्गं नाम उपकारकं तत्त्वम्। तथा च पाणिनीयव्याकरण-प्रवर्त्तनानन्तरं तस्य विशेषेण वेदोपकारकत्वात् तस्यैवाङ्गत्वं

युक्तम्। लोकेऽपि स्वस्थेऽधिकोपकारके चाङ्गे प्राप्ते तस्यैवाङ्गत्वं विधीयते। एतेनेदानीं पाणिनीयव्याकरणस्यैवाङ्गत्वे स्वीक्रियमाणे पाणिनीय-व्याकरणात् पूर्वं वेदस्य पञ्चाङ्गत्वापत्तिरिति कथनं न मनोरमम्। अत एवाग्रे ग्रन्थकृता एतन्मतमालोचितम्।

[11] वाक्यपदीयम् कारिका सं. 1/141

अवच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्। इति च कारिकाया उत्तरार्द्धम्।

[12] 'वा सुप्यापिशलेः' पा.सू. 6/1/92 इत्यादिषु पूजार्थमापिशल्या-दिग्रहणम्।

[13] 'त्रिप्रभृतिशाकटायनस्य' पा.सू. इत्यादिषु शाकटायनादिग्रहणं तत्प्रयोगसाधुत्वस्मरणार्थम्।

[14] भाष्योक्तेः ।

[15] वाक्यपदीयम् कारिका सं. 1/141

[16] ऋग्वेदः

[17] पा.सू. 1.4.2

[18] पा.सू. 8.2.1

[19] पा.सू. 1.1.37

[20] पा.सू. 1.1.39

[21] पा.सू. 1.1.40

[22] पा.सू. 1.1.38

[23] पा.सू. 1.1.11

[24] पा.सू. 1.1.13

[25] पा.सू. 1.1.12

[26] पा.सू. 1.1.19

[27] वाक्यपदीयस्य ब्रह्मकाण्डे प्रतिपादितम् ।

[28] चारुदेवशास्त्रिणा विचरितम्- व्याकरणमहाभाष्यस्य पस्पशाह्निके प्रतिपादितम्। पृ.सं. 14